# ॥ कार्तवीर्यार्जुन-द्वादशनामस्तोत्रम् ॥

ॐ श्रीं क्रों कार्तवीर्यार्जुनाय नमः।

कार्तवीर्यार्जुनो नाम राजा बाहुसहस्रवान्।
तस्य स्मरणमात्रेण गतं नष्टं च लभ्यते॥ १ ॥

कार्तवीर्यः खलद्वेषी कृतवीर्यसुतो बली।
सहस्रबाहुः शत्रुघ्नो रक्तवासा धनुर्धरः॥ २ ॥

रक्तगन्धो रक्तमाल्यो राजा स्मर्तुरभीष्टदः।
द्वादशैतानि नामानि कार्तवीर्यस्य यः पठेत्॥ ३ ॥

सम्पदस्तत्र जायन्ते जनस्तत्र वशं गतः।
आनयत्याशु दूरस्थं क्षेमलाभयुतं प्रियम्॥ ४ ॥

सहस्रबाहुसशरं महितं सचापं
रक्ताम्बरं रक्तकिरीटकुण्डलम्।
चोरादि-दुष्टभय-नाशम् इष्टदं तं
ध्यायेन्महाबल-विजृम्भित-कार्तवीर्यम्॥ ५ ॥

यस्य स्मरणमात्रेण सर्वदुःखक्षयो भवेत्।
यन्नामानि महावीर्यश्चार्जुनः कृतवीर्यवान्॥ ६ ॥

हैहयाधिपतेः स्तोत्रं सहस्रावृत्तिकारितम्।
वाञ्छितार्थप्रदं नृणां स्वराज्यं सुकृतं यदि॥ ७ ॥

॥ इति श्री-कार्तवीर्यार्जुन-द्वादशनाम-स्तोत्रम् ॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Kartaviryarjuna_Stotram.

generated on **August 16, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits